श्री महालक्ष्मी स्तोत्रं (विष्णु पुराणांतर्गतं)

श्रीगणेशाय नमः ।

श्रीपराशर उवाच

सिंहासनगतः शक्रस्संप्राप्य त्रिदिवं पुनः ।

देवराज्ये स्थितो देवीं तुष्टावाब्जकरां ततः ॥1॥

इंद्र उवाच

नमस्ये सर्वलोकानां जननीमब्जसंभवां । var सर्वभूतानां

श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षःस्थलस्थितां ॥2॥

पद्मालयां पद्मकरां पद्मपत्रनिभेक्षणां

वंदे पद्ममुखीं देवीं पद्मनाभप्रियामहं ॥3॥

त्वं सिद्धिस्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी ।

संध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती ॥4॥

यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ।

आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥5॥

आन्वीक्षिकी त्रयी वार्ता दंडनीतिस्त्वमेव च ।

सौम्यासौम्यैर्जगद्रूपैस्त्वयैतद्देवि पूरितं ॥6॥

का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः ।

अध्यास्ते देवदेवस्य योगचिंत्यं गदाभृतः ॥7॥

त्वया देवि परित्यक्तं सकलं भुवनत्रयं ।

विनष्टप्रायमभवत्त्वयेदानीं समेधितं ॥8॥

दाराः पुत्रास्तथाऽऽगारसुहृद्धान्यधनादिकं ।

भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणां ॥9॥

शरीरारोग्यमैश्वर्यमरिपक्षक्षयः सुखं ।

देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभं ॥10॥

त्वमंबा सर्वभूतानां देवदेवो हरिः पिता । var त्वं माता सर्वलोकानां
त्वयैतद्विष्णुना चांब जगद्व्याप्तं चराचरं ॥11॥

मा नः कोशस्तथा गोष्ठं मा गृहं मा परिच्छदं ।
मा शरीरं कलत्रं च त्यजेथाः सर्वपावनि ॥12॥

मा पुत्रान्मा सुहृद्वर्गान्मा पशून्मा विभूषणं ।
त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलाश्रये ॥13॥

सत्त्वेन सत्यशौचाभ्यां तथा शीलादिभिर्गुणैः ।
त्यज्यंते ते नराः सद्यः संत्यक्ता ये त्वयाऽमले ॥14॥

त्वयाऽवलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः ।
कुलैश्वर्यैश्च पूज्यंते पुरुषा निर्गुणा अपि ॥15॥

स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ।
स शूरः स च विक्रांतो यस्त्वया देवि वीक्षितः ॥16॥

सद्यो वैगुण्यमायांति शीलाद्याः सकला गुणाः ।
परांगमुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥17॥

न ते वर्णयितुं शक्ता गुणांजिह्वाऽपि वेधसः ।
प्रसीद देवि पद्माक्षि माऽस्मांस्त्याक्षीः कदाचन ॥18॥

श्रीपराशर उवाच
एवं श्रीः संस्तुता सम्यक् प्राह हृष्टा शतक्रतुं ।
शृण्वतां सर्वदेवानां सर्वभूतस्थिता द्विज ॥19॥

श्रीरुवाच
परितुष्टास्मि देवेश स्तोत्रेणानेन ते हरे ।
वरं वृणीष्व यस्त्विष्टो वरदाऽहं तवागता ॥20॥

इंद्र उवाच
वरदा यदिमेदेवि वरार्हो यदि वाऽप्यहं ।
त्रैलोक्यं न त्वया त्याज्यमेष मेऽस्तु वरः परः ॥21॥

स्तोत्रेण यस्तथैतेन त्वां स्तोष्यत्यब्धिसंभवे ।
स त्वया न परित्याज्यो द्वितीयोऽस्तु वरो मम ॥22॥

श्रीरुवाच
त्रैलोक्यं त्रिदशश्रेष्ठ न संत्यक्ष्यामि वासव ।
दत्तो वरो मयाऽयं ते स्तोत्राराधनतुष्टया ॥23॥

यश्च सायं तथा प्रातः स्तोत्रेणानेन मानवः ।
स्तोष्यते चेन्न तस्याहं भविष्यामि परांग्मुखी ॥24॥

श्रीपाराशर उवाच
एवं वरं ददौ देवी देवराजाय वै पुरा ।
मैत्रेय श्रीर्महाभागा स्तोत्राराधनतोषिता ॥25॥

भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्वमुदधेः पुनः ।
देवदानवयत्नेन प्रसूताऽमृतमंथने ॥26॥

एवं यदा जगत्स्वामी देवराजो जनार्दनः ।
अवतारः करोत्येषा तदा श्रीस्तत्सहायिनी ॥27॥

पुनश्चपद्मा संभूता यदाऽदित्योऽभवद्धरिः ।
यदा च भार्गवो रामस्तदाभूद्धरणीत्वियं ॥28॥

राघवत्वेऽभवत्सीता रुक्मिणी कृष्णजन्मनि ।
अन्येषु चावतारेषु विष्णोरेखाऽनपायिनी ॥29॥

देवत्वे देवदेहेयं मानुषत्वे च मानुषी ।
विष्णोर्देहानुरुपां वै करोत्येषाऽऽत्मनस्तनुं ॥30॥

यश्चैतशृणुयाज्जन्म लक्ष्म्या यश्च पठेन्नरः ।
श्रियो न विच्युतिस्तस्य गृहे यावत्कुलत्रयं ॥31॥

पठ्यते येषु चैवर्षे गृहेषु श्रीस्तवं मुने ।
अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन ॥32॥

एतत्ते कथितं ब्रह्मन्यन्मां त्वं परिपृच्छसि ।
क्षीराब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता सती ॥33॥

इति सकलविभूत्यवाप्तिहेतुः स्तुतिरियमिंद्रमुखोद्गता हि लक्ष्म्याः ।
अनुदिनमिह पठ्यते नृभिर्यैर्वसति न तेषु कदाचिदप्यलक्ष्मीः ॥34॥

॥इति श्रीविष्णुपुराणे महालक्ष्मी स्तोत्रं संपूर्णं ॥